No. १४७१

Title जागदीश्यां व्याप्त्यनुगम

Author जगदीश भट्ट: दीधिति व्याख्या

Extent ८ Age ४

Subject न्याय वैशेषिकं

शिरोमणिव्याख्यायां जागदीश्यां

व्याप्त्यनुगमदीधितिव्याख्या

१४७१ ८ पत्रे

॥श्रीरामजी सहाय॥ प्रतियोग्यसमानाधिकरणत्वादीत्यादिपदेन निरुक्तार्थस्य हेत्वधिकरणे प्रतियोग्यनधिकरणत्वविशेषणस्य परिग्रहः। तत्रापि। अन्यो
न्याभावगर्भव्याप्तिग्रहेपि। तदिति। प्रतियोगिनः तादात्म्येन यः संबंधी तद्वृत्तित्वादिरूपप्रतियोग्यसामानाधिकरण्यादिकं विषयतया प्रवेश्यमि
त्यर्थः। तटस्थः शंकते। नन्वेवमिति। एवं प्रतियोगित्वे व्यधिकरण्यविषयकत्वात्तर्भावेन हेतुत्वे। प्रतियोगिसामानाधिकरण्यादीत्यादिपदात्प्रति
योग्यसामानाधिकरण्यस्योपग्रहः। उक्तव्याप्यमतमाशंक्य निराकुरुते। नचेति। व्यभिचारिणि हेतुमन्निष्ठघटाभावप्रतियोगितानवच्छे
दकधूमत्वमित्यादिग्रहादनुमित्युत्पत्त्यर्थं पार्थतइति। तादृशाभावेति। निरुक्तावच्छेदकत्वाभावग्रहेत्यर्थः। तत्समवायात्। हेतुसमानाधि
करणाभावप्रतियोगितानवच्छेदकसंयोगत्वमित्यादिग्रहासंभवात्सामान्यघटितविशेषवत्तानिश्चयस्यापि सामान्याभाववत्त्वबुद्धौ विरोधि
त्वादिति भावः। प्रातिस्विकेति। तत्तदभावप्रतियोगितावच्छेदकत्वरूपेणेत्यर्थः। रूपांतरेणेति। हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वघ
टितधर्मेणेत्यादिः। तेन प्रमेयत्वादिना तद्ग्रहमादाय नातिप्रसंगः। प्रमेयीत्यत इष्टापत्तिमुद्भावय। नचेति। तथा च यस्य भावस्यापि हेतुसमाना
धिकरणत्वेन तापमानत्वात्तत्प्रतियोगितानवच्छेदकत्वाग्रहादेव तदानानुमितिरिति भावः। उक्तरूपेणेति। वह्नित्वावच्छिन्नधूमव
न्निष्ठाभावप्रतियोगितानवच्छेदकत्वरूपेणेत्यर्थः। संभवादिति। समानप्रकारकत्वेनैव ज्ञानस्य विरोधित्वात्तथा च इतोप्यनुमितिः स्यादिति
भावः। ननु प्राचां मते समानविषयकत्वेनैव ज्ञानस्य विरोधित्वाद्वह्नित्वे धूमवन्निष्ठासमाभावप्रतियोगितावच्छेदकत्वग्रहदशायां वह्नित्वाव
च्छिन्नधूमवन्निष्ठाभावप्रतियोगितानवच्छेदकं वह्नित्वमिति ग्रह एवासंभवतीत्यतो दोषांतरमाह। धूमाधिकरणेति। तासंदेत्यधूमादि ५१

करणानुपस्थितावित्यर्थः। तादृशेति। रासभत्वं धूमवह्निष्ठरासभत्वानवच्छिन्नाभावप्रतियोगितानवच्छेदकमितित्वं धूमवह्निष्ठयत्किंचिदनवच्छि-
न्नाभावप्रतियोगितानवच्छेदकमित्येव प्रमेयत्वादेपीत्यर्थः। रासभस्य धूमाधिकरणोपस्थितिदशायां रासभत्वेनिरूपानवच्छेदकत्वबुद्धेरिह
नतोऽनुपस्थितावित्यंतं। उक्तज्ञानादनुमितौ कदाचिदिष्टापत्तिं कुर्वंतो दोषांतरमाह एवमिति। वह्नेः शुक्लत्वग्रहे वह्न्यभावस्य शुक्लप्रतियो-
पृ ४ गिकत्वसंभवादिति। एवं च धूमवह्निष्ठशुक्लप्रतियोगिकाभावप्रतियोगितानवच्छेदकमित्येवं ग्रहो न संभवतीत्यतो भ्रमदशायामित्यंतं। शुक्ल-
प्रतियोगिका इत्यनेन अवच्छिन्नाभावस्य वह्नीतरप्रतियोगिका इत्यनेन च पदार्थाभावस्य निरुक्तरूपावच्छिन्नत्वं तस्य संग्रहः ग्रहेपीति। अननुमाना-
येत्यनुपपद्यते तथा च ततो व्यनुमितिः स्यादिति भावः। इदमुपलक्षणं। ज्ञायमानत्वाज्ञायमानत्वयोः सामान्यतः प्रवेशेऽतिप्रसंगः। तन्नत्का-
लीनत्वं तत्तद्रूपज्ञायमानत्वप्रवेशे तु प्रतियोगिसामानाधिकरण्यानुपस्थितिकालीनव्याप्तिग्रहासंभवः। पुरुषकालाद्यननुगमादननुगत
हेतुत्वापत्तेश्चेत्यपि द्रष्टव्यं। नन्वेवमित्यंतं। सिद्धांतोक्तैव व्याप्तिरिति। ते वाव्याप्तिरिति। प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकभे-
दत्वं साध्यताभावहेतुमन्निष्ठात्यंताभावप्रतियोगितावच्छेदकभेदत्वात्यंताभावानामित्यर्थः। ननु तादृशाग्रहविशेष्यविषयस्यतत्तद-
भावस्य यदि ज्ञानमात्रहेतुत्वं तदा प्रमेयत्वादिना पितस्य ज्ञानादप्यनुमित्यापत्तिस्तत्तद्रूपेण ज्ञानस्य हेतुत्वे चाननुगमस्तादवस्थ्यमि-
त्यत आह तादृशावच्छेदकेति। तत्तद्बुद्धीनामिति। तादृशावच्छेदकत्वाभावबुद्धीनामित्यर्थः। अत्र च प्रतियोगिव्यधिकरणहेतुमन्निष्ठा-
भावप्रतियोगितावच्छेदकत्वावच्छेदकत्वप्रकारिताव्यापकप्रकारित्वावच्छिन्नप्रतिविरोधित्वप्रवेशे तेन देवोपस्थितत्वादिविषयकता शिवः

नहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारित्वा ... प्रकारिताव्याप-
कत्वप्रवेशोऽपार्थ इति वाच्यं।

त१ टू१

दशावच्छेदकत्वग्रहस्य विरोधिघटाभाववद्भूतलमिति ज्ञानमादाय नातिप्रसंगः। घटवद्भूतलविषयिताया दशावच्छेदकत्वविषयित्वाव्या
पकत्वात् यत्तु निरुक्तावच्छेदकत्वमात्रविषयि[illegible]काचिज्ज्ञानव्यक्तिमादाय तत्तद्व्यक्तिविरोधित्वेनैवानुगमान्न दोष इति तन्न तथास
ति प्रतियोगिवैयधिकरण्यादेः कारणतावच्छेदककोटौ प्रविष्टतया सत्यमित्यादिना वक्ष्यमाणान्योन्याभावगर्भव्याप्तिस्ता न हेतुतानाप
वा[illegible]संगतत्वापत्तेः। यत्तु प्रतियोगितानवच्छेदकत्वघटितत्वात् अयथा धूमादित्यादौ प्रतियोगितानवच्छेदकत्वघटितत्वप्रतियोगिव्यधिक
रणधूमवन्निष्ठाभावप्रतियोगितावच्छेदकमित्याकारकत्वस्यापि तस्यैव सम्भवात् तादृशविरोधित्वाप्रसिद्ध्याऽनुगमो दुर्घट। न च तादृशाव
च्छेदकत्व[illegible]समानविशेष्यकग्रहविरोधित्वं प्रवेश्यमिति वाच्यं विशिष्टवह्नित्वधर्मिक आहार्यतादृशावच्छेदकत्वग्रहस्य विशेष्यवह्नित्वे
तद्विशेष्यकानां [illegible]यितानस्य विरोधित्वप्रसिद्ध्या न दोष इति वाच्यं तथा सति वह्नित्वनिरुक्तप्रतियोगितानवच्छेदकमित्याकारकत्वा
नवतोऽपि प्रतियोगितानवच्छेदकत्वघटितत्वप्रकारेणानुमित्यापत्तेः। तथापि प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगिताव
च्छेदकत्वग्रहस्य प्रतिबन्धकतावच्छेदकीभूतप्रकारितावच्छिन्नसाध्यतावच्छेदकविशेष्यिताकज्ञानत्वेनानुगमान्न दोषः। घटत्वादिध
र्मिकतादृशावच्छेदकत्वग्रहप्रतिविरोधितावच्छेदकं यद्धूमवन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वप्रकारित्व
तदन्यैव प्रतियोगितानवच्छेदकत्वघटितविशेष्यकव्यापकतावच्छेदकत्वज्ञानसौ[illegible]ध्यमिति इदं तु चिंत्यते। प्रतियोगिव्यधिकरणहेतुम

त्वग्रहद्द
ला५

ल१

(ज्ञानत्वेन कारणत्वे कौघट वह्न्यनुमानं इत्याकाराभावादेतु ?)
(मित्यापत्तिरत आह वह्नीति ?)

2 निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वे तद्धूमलिंगकवह्न्यनुमितौ न व्याप्तिज्ञानहेतुत्वं नाभावात् एवं हि ज्ञानत्वादिनैव तत्र हेतुत्वसं
भवात्। नचोक्तावच्छेदकत्वग्रहविरोधि धूमवत्पर्वतनिश्चयत्वेनानुगतरूपेण प्रतियोगिवैयधिकरण्यविषयाविषयकपरामर्शोनुमितौ हेतुः।
धूमव्यापको वह्निर्धूमवांश्च पर्वत इत्यादिसमूहालंबनादपि पर्वतो वह्निमानित्यनुमित्यापत्तेः। किंच प्रतियोगिव्यधिकरणत्वमत्र यत्र प्रतियोगि
व्यधिकरणत्वमवश्यं वाच्यं तथा च तत्त्वस्यैकस्याभावादेकस्य मात्र यत्र प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदक
त्वग्रहविरोधित्वेनानुगमे तादृशाभावात् तत्प्रतियोगितावच्छेदकत्वग्रहदशायामनुमित्यापत्तेः। किंचोक्तग्रहविरोधितावच्छेदकीभूत
प्रकारितावन्निश्चयत्वेनैव हेतुत्वं वाच्यं तथा च निश्चयत्वस्य तत्प्रकारितावच्छिन्नमतपाऽननुगमो दुर्वार इति दिक्॥ हेतुमन्निष्ठाभावप्र
तियोगितानवच्छेदकत्वबुद्धावुक्तग्रहविरोधित्वसंगमयति विशिष्येति। [redacted] सामान्यपदितेति। तेन द्रव्यसामान्या
भावग्रहेपि घटवत्त्वग्रहोत्पत्तौ न क्षतिः। घटो नास्तीति प्रत्यय इत्यादिः। पटेति। तत्र कास्येति। उत्तरयतीति। न हीति। घटत्वविशि
ष्टवैशिष्ट्यावगाहिज्ञानप्रत्ये यघटत्वावच्छिन्नाभावनिश्चयत्वेन प्रतिबंधकत्वं घटवदित्याकारकबुद्धिव नीलघटवदित्यपि बुद्धि
र्घटविशिष्टवैशिष्ट्यावगाहिनीति भावः। अत एवोक्तविरोधित्वेनानुगमादेवा। अन्यथा अवच्छेदकभेदमात्रप्रवेशोऽवच्छेदकावान्यंता
भावबुद्धसंग्रहापत्तिरिति भावः। ननु प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वं तादृशावच्छेदकत्वा शिवं

प्रकारांतरेण (हेतुमन्निष्ठ)

(प्रअभावप्रतियोगितानवच्छेदकत्वग्रहे इत्यर्थः)

भावव्याप्यवत्वग्रहस्यापि तथात्वात्तादृशावच्छेदकत्वव्यावर्तकधर्मदर्शनस्यापि तथात्वात्ततोऽप्यनुमित्यापत्तिरत आह हेत्वाभासेऽ इति तथा च यथा व्याप्तिग्रह
विरोधित्वादिरूपसव्यभिचारित्वादिलक्षणविरोधित्वमिति वक्ष्यमाणवत्तिव्याप्तिवारणार्थं साध्यतावच्छेदकादिमत्त्वग्रहविरोधित्वान्यत्वेन विशिष्य
ते तथात्रापि तादृशावच्छेदकत्वग्रहविरोधित्वं तादृशावच्छेदकत्वाभावव्याप्यत्वादिविषयकत्वाघवच्छिन्नविरोधिताभिन्नत्वेन विशेषणीयमिति
भावः। अनवच्छेदकत्वादीत्यादिपदेन प्रतियोगितावच्छेदकभेदादेः संग्रहः। केवलान्वयित्वग्रहस्यानुमितिहेतुत्वमनंगीकुर्वतां तन्मतानुमितिरेवेत्य
तोपादियेत्युक्तौ। तादृशावच्छेदकत्वग्रहविरोधित्वमिति तत्पाश्चात्यावच्छेदकत्वग्रहविरोधित्वान्यत्वमित्यर्थः। निवेशनीयमिति। निरुक्तवि
२६ रोधित्वमिति विशेषणे। तेन प्रतियोगितावच्छेदकप्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वग्रहस्यमिति। ज्ञानस्य ना
(पाः३) नुपसंग्रहः। न चैवमप्यभावीयहेतुसमानाधिकरणमित्यादिज्ञानेऽतिप्रसंगः। अभावादौ हेतुसामानाधिकरण्यग्रहविरोधित्वेनापि विशे
षणीयत्वात्। वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारिताऽन्यसाम्नतरत्ति प्रकारितानवच्छिन्नत्वेनैव प्रतिबध्यत्वं विशेष्यताया
नैव प्रतियोगितानवच्छेदकत्वग्रहत्वादि इत्यादिबुद्धेरपि उक्तासादिति ध्येयं। विशेषणस्य प्रतियोग्यसमानाधिकरणत्वरूपस्य दानमित्यर्थः। प्रति
योग्यवृत्तित्वस्यैवेत्येवकारेण प्रतियोग्यधिकरणावृत्तित्वस्य व्युदासो व्यवच्छेदः। ननु यत्समानाधिकरणाभावीयविशेषणताविशेषावच्छि
न्नप्रतियोगितासामान्ये साध्यसमानाधिकरणात्यन्ताभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकावच्छेदत्वं नास्तित
त्वमित्यत्यन्ताभावगर्भव्याप्तौ निरुक्तायां प्रतियोगिवैयधिकरण्याप्रवेशात् दोषइत्यत आह। नचेति। नवेत्यर्थः। यत्समानाधिकरणा

(इसाध्यतावच्छेदकावच्छेदत्वं नास्तिइत्येवोक्तौ यस्य भावाभावस्य वह्नेः अभावप्रतियोगितायाः ध्वस्त्वाच्छे
इत्यत्र नास्तीति सत्त्वाच्च हेतित्पादायति व्याप्तिरिति ध्येयम्)

३

न्योन्याभावप्रतियोगितासामान्ये साध्यवन्निष्ठान्योन्याभाववप्रतियोगितानवच्छेदकावच्छेदत्वं नास्तित्वमित्यन्योन्याभावगर्भव्याप्तौ स्वप्र
तियोगित्वांशे संबंधविशेषाप्रवेशाल्लाघवमुक्तायामत्यन्ताभावगर्भायां तु विशेषणताविशेषावच्छिन्नत्वेन प्रतियोगितायां निवेशात् गौरव
मिति अन्योन्याभावगर्भायां हेतुत्वे विनिगमकमिति भावः। अन्योन्याभाववत्त्वमपि यदि तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभाववत्त्वेन
त्वमवडोपाधिस्तदा तत्र हि तव्यात्येरपि संबंधविशेषनिवेशाल्लाघवस्यानवकाशः। वस्तुतोऽत्यन्तान्योन्याभावघटितयोर्द्वयोरपि व्याप्त्योर्नानुमि
न्५ त्युपयोगित्वमिति चेत्। साध्यवदन्यवृत्तित्वस्यैवानुगततया वक्ष्यमाणत्वादित्याशयेन यथाश्रुते तु त्वो। अपरे तु लक्षणयानुरोधिनंद्वि
द्वियेति तत्पायद्रव्यप्रत्यक्षत्वावच्छिन्नप्रतियोगिकव्यभिचारेऽपि द्रव्यपाक्षपत्वावच्छिन्नप्रति एवयपापय क्ष्कः संयोगत्वादिना हेतुत्वेन तथानुमितित्वा
वच्छिन्नप्रतिव्यभिचारित्वेऽप्यत्यन्ताभावगर्भव्याप्यत्वावगमदशायां कानुमितित्वावच्छिन्नं प्रत्येवात्यन्ताभावगर्भव्याप्तिज्ञानत्वादिना हे
तुत्वं वाच्यमिति भावः। तद्रूपेति तथा च साध्यतावच्छेदकसाध्यवत्त्वं च साध्यवत्ताग्रहविरोध्यभावग्रहविषयतावच्छेदकत्वे नानुगमप्य
हेतुधर्मिकतदवच्छिन्नाभावसामानाधिकरण्यग्रहाविरोधित्वेनैव व्याप्तिधियोऽनुमितिहेतुत्वमिति भावः। तद्ग्रहस्य। साध्यतद्वता
रत्यन्तान्योन्याभावग्रहस्य किंचिदभावान्तरे प्रतियोगितासंबंधेन साध्यीयत्वावगाहित्वेन अत्र साध्यभेदस्य साध्यवदत्यन्ताभावस्य
च साध्यवत्ताग्रहविरोधितावच्छेदकरूपावच्छिन्नाभावत्वात् तत्सामानाधिकरण्यविरोधिनः साध्यभेदासामानाधिकरण्यस्य साध्य
वदत्यन्ताभावासामानाधिकरण्यस्य वा ग्रहे सत्यनुमित्यापत्तिः। किं च भिन्नविषयकग्रहस्यापि विरोधित्वे साध्यवद्भेदान्तर्भावे शिवः

(प्रक्षुः संयोगत्वेन द्रव्यत्वप्रत्यक्षत्वं चन्द्रदेः जातेपि वा द्रव्यत्वप्रत्यक्षापिस्यादित्येव व्यभिचारः)

ण्यानुगमोऽयमर्थः। साध्यात्यन्ताभावसामानाधिकरण्यग्रहविरोधित्वे नैवान्योन्याभावगर्भव्याप्तिज्ञानस्याप्यनुगमसम्भवो ऽतो येतु साध्य
वद्भेदग्रहस्य साध्यवत्ताग्रहविरोधित्वात्तदुक्तक्रमेणानुगमाशक्यत्वमित्यस्वरसेनाह तत्रेत्यपि तिसृणां तस्मादाह साध्यतावच्छेदकेत्यादि।
वद्वतीत्यन्तेन नव्यमते ऽत्यन्तान्योन्याभावगर्भव्यापकत्वग्रहे तु अत्यन्ताभावगर्भव्यापकताग्रहस्याविरोधित्वात्तदुभयसम्भवार्थं अवगाहि
त्वरूपोक्तिः। ननु साध्यतावच्छेदकेतादृशावच्छेदकत्वावगाहिसाध्यतावच्छेदकावच्छिन्नसाध्यवत्वे चेतादृशान्योन्याभावप्रतियोगिताव
च्छेदकत्वावगाहीयो ग्रहस्तद्विरोधित्वेनानुगमे गौरवमित्यत आह साध्याभावेति। तथा पाचकत्वे साधनस्यैव विशेष्यतया निवेशेन
तु साध्यतावच्छेदकतदवच्छिन्नसाध्ययोर्विशेष्यतया निवेश इति लाघवमिति भावः। पक्षसाध्यव्यापकताज्ञानेनानुमितिहेतुः साधन
भेदेन नानात्वात् किन्तु साध्याभाववद्वृत्तित्वस्य साध्यवदन्यावृत्तित्वस्य चद्वयोरेव ज्ञानं हेतुः। साधनभेदेप्यभेदात् अत एव केव
लान्वय्यनुमितिरिति नव्यमतमनुसृत्याह साध्याभाववतीति केचित् साधनधर्मिकेत्यादिः। अत्राप्युभयत्र वैशिष्ट्यं पूर्ववद्विरोधित्वादिकमि
त्यादिना तत्तद्व्याप्यभावकूटावगाहिभ्रमरूपग्रहविरोधित्वादेः परिग्रहः। ननु जातिमान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकसमवायादिसंबन्धे
न साध्याभाववद्वृत्तित्वोप्रसिद्ध्या तदवगाहिग्रहविरोधित्वं दुर्वचमत आह प्रसिद्धिरिति। तथा च समवेतत्वे साध्याभाववदीयत्वादिअ
वगाहिभ्रमरूपरवग्रहो पर्तव्य इति भावः। ननु व्यभिचारव्यावर्तकधर्मवत्ताज्ञानस्यापि व्यभिचारग्रहविरोधित्वात्तत्रातिप्रस
ङ्ग इत्यत आह धार्मिकमिति। तादृशज्ञानव्यावर्तो विरोधिविशेषणमेव निवेशनीयमिति भावः। ननूक्तक्रमेणात्यन्ताभावगर्भव्याप्तेरनुमि

५ तिहेतुत्वे अन्योन्याभावगर्भव्याप्तिरित्यादिग्रन्थासंगतिरत आह ग्रन्थपक्षित्विति अन्योन्याभावगर्भपदस्यानौपाधिकत्वान्यतरत्वादितिभा
वः। अनौपाधिकत्वमात्रव्यवच्छेदे स्वारस्यं दर्शयति। यदित्यादि। अन्यथा अनौपाधिके तु तल्लक्षणमित्येवं स्यादिति भावः। अथोक्तव्य वू२
हविरोधित्वमात्रेण हेतुत्वे अनौपाधिकत्वज्ञानस्यापि कारणतापत्तिः। तस्यापि सो×पादिकं×पाधित्वमतर्भाव्य प्रोव्यभिचारग्रहस्त
द्विरोधित्वेनोक्तरूपत्वात्। तान्यतादृशग्रहत्वाव्यापकविषयिताश्रन्यग्रहविरोधिज्ञानत्वेनैव हेतुत्वं सोपाधित्वविषयतानुत्तादृशग्र
हत्वाव्यापिकैवेति नातिप्रसंग इति वाच्यं। ज्ञानभेदेन विभिन्नानां सर्वासामेव विषयितानां तादृशग्रहत्वाव्यापकत्वेनूतनच्छून्यग्र
हाप्रसिद्धेः। उक्तक्रमेण हेतुत्वापेक्षया जागरूपवै सोपाधित्वापविषयकयत्किंचिदुक्तग्रहमुपादायतदपेक्षि विरोधित्वेनैव हेतुत्वोपपत्ते
श्चानयेष्टापत्तिस्तथैवग्रन्थतात्पर्यादिति वाच्यम्। तथासति तादृशीरनन्तव्यक्तीरूपादायप्रत्येकतद्ग्रहविरोधित्वेनानुमितिहेतुता
यामनन्तकार्यकारणभावापत्तेः। विरोधितावच्छेदकभेदेन विरोधित्वस्यापि भिन्नत्वात्। तद्रूपेणानुगमासंभवाच्च। इत्यस्वरसाद्वदती
त्युक्तं। अज्ञान रूपासिद्ध्युपजीव्यतयाव्यभिचारस्य नाभासत्वं किंतु व्याप्तिविरोधित्वेन तच्चोपाधिज्ञानस्य नास्तीत्यसौ ना
भास इति मतानि प्राप्य प्रकाशयन्नाह व्यभिचारज्ञानस्येति। नन्वपाधिधर्मिकसाध्यव्यापकत्वादिज्ञानस्यपि धर्मिकतया हेतौ व्या
प्तिग्रहाविरोधित्वेपि हेतुधर्मिकसोपाधित्वज्ञानस्य व्याप्तिधीविरोधित्वसंभवात् न स्यान्यस्येत्यादिग्रन्थसंगतमतस्तदपिदू
षयति। नोपाधित्वेति। नव्याप्तीति। न साक्षाद्व्याप्तिधीविरोधी त्यर्थः। विरोधिविषयत्वात्। विरोधिविषयताश्रन्यत्वादित्यर्थः। शिवः।

ननु परस्परविरोधिन एव सोपाधित्वस्य कुतो नाभासत्वमत आह वक्ष्यते हीति । न यानौपाधिकत्वेत्यादि । तस्य हेतुत्वनियमानादित्यनुनता
मपाकर्तुमाह । निरुपाधित्वस्येति । तथात्वेपि । निरुपाधिपोर्व्याप्तिग्राहकत्वेपि । आभासत्वापोगादिति । अनुमितौ तत्कारणपरामर्शे तस्या
विरोधित्वादिति भावः । तद्घटितेति । हेतुमन्निष्ठान्योन्याभावघटितेत्यर्थः । केवलान्वयित्वादिति । तथा च तस्य प्रतियोगिवृत्तित्वाद्धेतुसमा
नाधिकरणो यः प्रतियोग्यवृत्ति यदन्योन्याभावस्तत्प्रतियोगितानवच्छेदकमेव साध्यवत्त्वमतः संयोगिसत्त्वादित्यादावतिव्याप्तिरिति
भावः । यद्यपि प्रागुक्तक्रमेण हेतुसमानाधिकरणस्य द्रव्यभेदस्यैव पारिभाषिकावच्छेदकं संयोगवत्त्वं मतो नातिप्रसङ्गः । तथापि य
त्रासद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैव पारिभाषिकावच्छेदकत्वविशेषो ननु सर्वत्रेत्यभिप्रेत्य गुरुधर्मस्य
प्रतियोगितावच्छेदकत्वमादृत्य वा इदमुक्तं । इदन्तु चिंत्यते । स्वप्रतियोगितावच्छि[illegible] यद्धेत्वधिकरणनिष्ठान्योन्याभाव नपि ६
इत्याद्युक्तौ न कोपि दोषः । वृक्षे संयोगिभेदसत्त्वेपि तत्प्रतियोगितावच्छिन्नभेदविरहादेव संयोगिसत्त्वादित्यादावव्याप्तिविरहात्
क्षः संयोगिभेदप्रतियोगी नेत्यप्रत्ययात् प्रतियोगिभेदेपि न चैवं न प्रतियोगित्वस्यैव सत्त्वसत्त्ववत्तिगुणादौ च संयोगिभेदप्रतियो
गित्वावच्छिन्नस्यापि भेदसत्त्वात् संयोगिसत्त्वादित्यादावतिव्याप्त्यनवकाशात् । अस्तु वा स्वप्रतियोगिपदं तत्तद्व्यक्तित्वावच्छिन्न
भेदकूटवद्धेत्वधिकरणवृत्तिरेवान्योन्याभावो व्याप्तिघटकः । तथापि न क्षतिः । संयोगिभेदप्रतियोगितत्तद्व्यक्तिरेव भेदस्य तद्वृक्षे
विरहेण संयोगिसत्त्वादित्यादावव्याप्तिविरहादसादिति । साध्यादिभेदेन व्याप्तिभेदस्यावश्यकत्वात् तत्रैकनिरुक्ताभावेपि न क्षतिरि

शि०टी०ज्ञा० काऽलोपद्वाम्न हाकालत्वादित्यादावेवलक्षण्यसम्बन्धप्रसंभवात तत्र गगन स्यकालिकसंबंधेन वृत्तिमत्वस्वीकारादिति बोध्यं ५)

5 त्याशयेन शंकते अथेति। स्वव्यापकेति। हेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकीभूत साध्यसामानाधिकरण्यमित्यर्थः। स्वव्यापके
ति। स्वप्रकृतसाध्यतद्व्यापकतावच्छेदकं तन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपम् अधिकरणतानिरूपक
तावच्छेदको धर्मस्तदवच्छिन्नात्यंताभावासामानाधिकरण्यमित्यर्थः। तेन नान्योन्याभावगर्भत्वहानिः। गगनादेर्निरुक्तव्यापक त्वा ३
तावच्छेदकत्वेपि अधिकरणतानिरूपकतावच्छेदकत्वविरहाद्रूपपदेन एवकारेण तदवच्छिन्नाभावसामानाधिकरण्यस्य धूमा मत४)
दौ सत्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः। उक्तापेक्षया लाघवादाह तादृशरूपविशिष्टेति। साध्यव्यापकतावच्छेदकरूपाव
च्छिन्नेत्यर्थः। तथा च साध्यवन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकरूपावच्छिन्नान्योन्याभावासामानाधिकरण्यं फलि
तम्। न च तादृशरूपविशिष्टान्योन्याभाववृत्तिकालिकसंबंधेन धूमादेः सत्वाद्वह्निमान् धूमादित्यादौऽव्याप्तिः। हेतुतावच्छेदकसं
बंधेन वृत्तित्वे तु सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः सत्वव द्रव्यसमवेतत्वाप्रसिद्धेरिति वाच्यम्। तादृशरूपावच्छिन्नान्यो
न्याभावाधिकरणवृत्तित्वस्याधिकरणताकत्वस्य विवक्षितत्वादत एव विशिष्टसत्ताया द्रव्यान्यवृत्तित्वेपि द्रव्यं विशिष्टस
त्वादित्यादौ नाव्याप्तिः। विशिष्टनिरूपिताधिकरणत्वस्य द्रव्यान्यवृत्तित्वाभावात् संयोगिसत्वादित्यादौ च तादृशसाध्यव्या
पकतावच्छेदकीभूतद्रव्यत्वावच्छिन्नान्योन्याभाववद्वृत्तित्वस्यैव सत्ताधिकरणतायाः सत्वान्नातिप्रसंगः। स्वपतीत्यादि। स्वपतिवि शिवः
षयत्वं संस्कारविषयत्वं जन्यज्ञानविषयत्वं च केवलान्वयि महाप्रलयावच्छेदेन परमाण्वादौ असत्वाद्व्याप्यवृत्ते

यद्धर्मावच्छिन्नाधिकरणताकत्वस्य विवक्षणादेव ४)

हेत्वधिकरणा ४)

(१ अथ छेपत्वंसमस्यर्थः)

वपुस्तवेवैपरस्मात्पुनैस्मर्यतेइत्यादिव्यवहारात् तथा च तादृशसाध्यकद्रव्यत्वादिहेतोरव्याप्यवृत्तिसाध्यकस्थलीयलक्षणद्वयोरव्याप्तिः प्रथमेऽभाव
त्वादेरेव साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावाप्रसिद्धेरिति। द्वितीये चाभाववत्त्वादेर्वृत्तिनियामकसाध्यव्यापकतावच्छेदकत्वात् तदव
च्छिन्नान्योन्याभावाप्रसिद्धेरिति भावः। उक्तौ ×त्यतं× धकनियम्ययोः स्मृतेः सार्वत्रिकत्वे मानाभावात् संस्कारविषयत्वोपादानात्।
नियतोपेक्षात्मकविषयत्वेन संस्कारविषयस्यापि वक्तुं संभवात् जन्यज्ञानविषयत्वात्तु यावत्सर्वं देवसर्वज्ञनित्यज्ञानविषयता
सत्त्वादव्याप्यवृत्तित्वसमत्वे जन्यपदम्। का गतिः। कथमव्याप्युद्धारः। साध्याधिकरणेति। स्वहेतुः संयोगिसत्त्वादित्यादौ संयोगवत्त्वस्यापि
साध्यनाधिकरणद्रव्यवृत्तित्वात्तदवच्छिन्नभेदमादाय तिव्याप्तिवारणं न स्यादतो यत्किंचिदिति। तथा च संयोगवत्त्वावच्छिन्नभेदस्या
पि साधनवद्गुणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वात्तत्प्रतियोगितावच्छेदकमेव साध्यवत्त्वमतो नातिप्रसङ्गः। न च यत्किंचिद्व्यक्त्ये
कस्याभावात् साधनाधिकरणद्रव्यमात्रावृत्तिव्याप्तितादवस्थ्यं संयोगिभेदस्य साधनाधिकरणैकव्यक्तिवृत्तिधर्मानवच्छिन्नप्र
तियोगिताकत्वेपि तादृशयत्किंचिदन्तरवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वे बाधकाभावात् साधनाधिकरणतत्तद्व्यक्तिवृत्तिधर्मानवच्छि
न्नप्रतियोगिताकान्योन्याभावप्रतियोगितावच्छेदकत्वाभावकूटवत्त्वस्यैव निविष्टत्वाद्दोष इत्यपि कश्चित्। साध्यनाधिकरणयत्किं
चिद्व्यक्तिवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वे संयोगी द्रव्यत्वादित्यादावव्याप्तिः। संयोगवत्त्वावच्छिन्नभेदस्य वृक्षावृत्तिसंयोग
त्वेनाप्यवच्छिन्नत्वात् प्रतियोगिताकत्वात् अतस्तत्परित्यागः। पञ्चम्येवमपि रूपसामान्याभाववान् घटत्वादित्यादावव्याप्तिः रूपसा

6

मान्याभाववत्वावच्छिन्नान्योन्याभावात्मकस्यरूपस्यैवसमवेतसामान्याभाववत्वावच्छिन्नप्रतियोगिताकतयासाध्यनवच्छिन्नधर्मानव
च्छिन्नप्रतियोगिताकत्वात्।तथापिस्यादवधिकरणपक्षिंचित्स्फिटतिधर्मानवच्छिन्नपदन्योन्याभावप्रतियोगित्वतदनवच्छेदक
साध्यवत्वेतात्पर्यासाध्यवत्वेपाञ्जसाध्यतावच्छेदकधर्मावच्छिन्नसाध्यमात्रंननुतदवच्छिन्नाधिकरणत्वं।तथासतिदैशिकविशे
षणतयाहेत्वधिकरणवृत्तित्वंनिवेश्यैवनिर्दोषत्वेनवक्ष्यमाणातिव्याप्त्यसंगत्यापत्तेरितिध्येयम्।नचैवंघटवन्महाकालत्वादि
त्यादौतादृशान्योन्याभावाप्रसिद्धिः।विषयित्वादिसंबंधेनगगनादिमतोभेदस्यैवतथात्वादितिभावः।नचिदसंयोगिविशिष्टसं
त्यादित्यादावव्याप्तिः।संयोगवत्वावच्छिन्नभेदस्यसाधनीभूतसत्वाधिकरणगुणवृत्तिधर्मानवच्छिन्नप्रतियोगितात्वादतआ
ह।यत्तद्धर्मविशिष्टेति।प्रकृतहेतुतावच्छेदकविशिष्टेत्यर्थः।निरुक्तसाध्यवत्केत्वसमनादिसाधारणमतउक्तंतद्धर्मविशिष्टमिति
स्वरूपसंबंधेनकालिकादिसंबंधेनतादृशेति।हेत्वधिकरणपक्षिंचिदप्रक्षिप्तधर्मानवच्छिन्नप्रतियोगिताकोन्योन्याभावयश्चि
रानीतघटत्वावच्छिन्नत्वावच्छिन्नभेदस्यप्रतियोगितानवच्छेदकत्वादित्यर्थः।जातिमत्वेनेति।तथाचहेत्वधिकरणपद्रव्यादि
कततसमवेतानवच्छिन्नप्रतियोगिताकस्यघटादिभेदस्यप्रतियोगितानवच्छेदकमेवजातिमत्वमित्यतिव्याप्तिरितिभावः।
ननुसाधनवतिसामान्यादौजातिमत्वावच्छिन्नभेदसत्वान्नातिव्याप्तिरतआह जातिशून्यइति।तथाचसामान्यादौसमवेत
त्वाप्रसिद्धैवतादृशसाधनाधिकरणनक्षणघटकमितिभावः।एतेनेति।तथाचमासाप्रसिद्धागहस्यप्रमात्वकुत्रापिनेति

तथात्वेऽन्योन्याभावस्याव्याप्यवृत्तित्वे। अव्यापकमेवेति। संयोगवत्त्वावच्छिन्नभेदस्यापि उत्पत्तिकालावच्छेदेन घटादौ सत्त्वादिति भावः।
प्रतियोगिवैयधिकरण्यं च तद्भेदकूटवत्त्वेन हेत्वधिकरणत्वप्रवेशे तु नैव दोष इति ध्येयं। स्वाधिकरणेत्यादि प्रकृतहेत्वधिकरण
यत्किंचिद्व्यक्तिनिष्ठाधिकरणतानिरूपकतावच्छेदकरूपधर्मावच्छिन्नं यदत्यंताभावप्रतियोगित्वं तदवच्छेदकीभूतसाध्यतावच्छे
दकधर्मावच्छिन्नसामानाधिकरण्यमित्यर्थः। तेन सत्तायां गुणवृत्तित्वेपि विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः। न वाऽप्र
युक्तरीत्या रूपसामान्याभाववान् घटत्वादित्यादावव्याप्तिः। पूर्ववदिति। संबंधसामान्ये न हेत्वधिकरणवृत्तित्वोक्तौ गुणः स्पं
दत्वादित्यत्र साध्यतावच्छेदकसंबंधेन तथात्वोक्तौ च जातिमान् स्पंदत्वादित्यत्रातिव्याप्तिः। स्वप्रतियोगीति। स्वावच्छेदकधर्मावच्छि
न्नाधेयत्वानिरूपकहेत्वधिकरणनिष्ठाभावीयप्रतियोगित्वं तदनवच्छेदकमित्यर्थः। तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्या
प्तिः। आधेयत्वं च साध्यतावच्छेदकसंबंधावच्छिन्नं ग्राह्यं तेनातो गुणः स्पंदत्वादित्यादौ अतिव्याप्तिः। जन्यानाधेयेति संयोगनिष्ठाधेयत्वा
निरूपकत्वोपगमे इत्यन्वयः। द्रव्यत्वस्य हेतुतास्थले उत्पत्तिप्रलययोरन्यावच्छेदेनैव हेतुमतः साध्यनिष्ठाधेयत्वानिरूपकत्वं संभवति
अतो यादृशहेतुतास्थले प्रलयावच्छेदेनैव तद्धेतुः साध्यनिष्ठाधेयत्वानिरूपकत्वं तदुदाहरयति। ज्ञानपरिमाणेयेति। संयोगसाध्य
क इत्यनुषज्यते यावत्साध्यव्यापकत्वरूपानौपाधिकत्वव्याप्तिं निष्कृष्य तितिज्ञापयति। साध्यसमानाधिकरणेत्यादिना। अत्र प्रति
पदव्यावृत्तिर्व्याप्तिवादे एव प्रागुक्तत्वात्। अनवच्छेदके त्यत्राभावद्वयप्रवेशे गौरवादाह स्वसमानाधिकरणेति। तत्संबंधावच्छिन्न

7 साध्यप्रवेशे साध्यवदादिस्वसमानाधिकरणा। सर्वं इत्यादि। यद्धर्मावच्छिन्नसामानाधिकरण्यत्वं हेतुसामानाधिकरण्यवन्निष्ठान्योन्याभावप्र
तियोगितानवच्छेदकतद्धर्मावच्छिन्नसामानाधिकरण्यमित्यर्थः। व्यापकत्वविनाप्यावत्वस्य दुर्वचत्वादिति ध्येयं। अत्र सामानाधिकरण्य
स्याव्याप्यवृत्तितायाः प्रमाणकत्वे धूमसमानाधिकरणस्य घटाभावादेर्वह्न्याद्यनधिकरणदेशावच्छेदेन वह्नित्वावच्छिन्नसामाना
धिकरण्यविरहात् वह्निमान् धूमादित्यत्राव्याप्तिः। न च हेतुसामानाधिकरण्यवत्त्वं निरवच्छिन्नविशेषणतासंबन्धेन वाच्यमतो नोक्त
दोषः। साध्यनीभूतधूमाद्यधिकरणावच्छेदेनैव वर्त्तनात् सामानाधिकरण्यवत्वेन निरवच्छिन्नविशेषणतया धूमसामानाधिक
रण्यस्यैवाप्रसिद्धेः अतो गुर्व्वपि लक्षणान्तरमाह। साध्यसामानाधिकरण्याभावेति। अत्र व्यापकताघटकं साध्यसामानाधिकरण्या
भाववत्त्वं निरवच्छिन्नविशेषणताविशेषसंबन्धेन ग्राह्यं तेन घटाद्यभावस्य वह्न्यधिकरणदेशावच्छेदेन वह्न्यादिसामानाधिकरण्याभा
भाववत्त्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिः। धूमवान् वह्नेरित्यादौ च निरवच्छिन्नविशेषणतया साध्यसामानाधिकरण्याभावस्याश्र
येतप्तायःपिण्डादौ तत्प्रकारकप्रमाविषयत्वादौ च हेतुसामानाधिकरण्यस्याभावविरहात् नातिव्याप्तिरिति ध्येयं। साध्यतेति। तेन घट
त्वमान् प्रमेयत्वादौ कालिकसंबन्धेन घटत्वाद्यधिकरणतद्वृत्तित्वविरहात् नातिव्याप्तिः। न तु द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। कालवृत्तित्वा
भावस्यावृत्तेरेव त्वात्र हेतुसामानाधिकरण्याभावसत्त्वात्। न च दैशिकविशेषणतासंबन्धेन साध्यवद्वृत्तित्वं निवेश्यमिति नोक्त
दोषः। तथा सति ताद्रशवृत्तित्वस्याभाववति पर्वतत्वादौ समवायादिसंबन्धेन हेतुमद्वृत्तित्वस्य सत्त्वेन वह्निमान् धूमादित्यादौ च शि॰ व॰

8 व्याप्याप तेशहवृत्तित्व या येति। साध्याधिकरणवृत्तित्वं हेत्वधिकरणवृत्तित्वं च इत्यर्थः। एकेनेति। यत्सबंधावच्छिन्नत्वसाध्यवृत्ति
त्वं लक्षणस्य घटकं तत्सबंधावच्छिन्नमेव हेतुमद्वृत्तित्वं निवेश्यमित्यर्थः। यत्तद्रूपोरननुगतत्वात्समवायेन तादृशवृत्तिताद
यस्याभावमादाय सत्तावान्मेयत्वादित्यादावतिव्याप्तिरतः श्वाह विशेषणेति॥ ७॥ इति व्याप्त्यनुगमस्य दीधितिव्याख्या संपूर्णा॥ ७॥

१५६

३००